श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीधन्वन्तर्यष्टोत्तरशतनामावलिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीधन्वन्तर्यष्टोत्तरशतनामावलिः ॥

| | | | |
|---|---|---|---|
| 1 | ओं धन्वन्तरये नमः | 2 | ओं सुधापूर्णकलशाढ्यकराय नमः |
| 3 | ओं हरये नमः | 4 | ओं जरामृतित्रस्तदेवप्रार्थना-साधकाय नमः |
| 5 | ओं प्रभवे नमः | 6 | ओं निर्विकल्पाय नमः |
| 7 | ओं निस्समानाय नमः | 8 | ओं मन्दस्मितमुखाम्बुजाय नमः |
| 9 | ओं आञ्जनेयप्रापिताद्रये नमः | 10 | ओं पार्श्वस्थविनतासुताय नमः |
| 11 | ओं निमग्नमन्दरधराय नमः | 12 | ओं कूर्मरूपिणे नमः |
| 13 | ओं बृहत्तनवे नमः | 14 | ओं नीलकुञ्चितकेशान्ताय नमः |
| 15 | ओं परमाद्भुतरूपधृते नमः | 16 | ओं कटाक्षवीक्षणाश्वस्तवासुकये नमः |
| 17 | ओं सिंहविक्रमाय नमः | 18 | ओं स्मर्तृहृद्रोगहरणाय नमः |
| 19 | ओं महाविष्ण्वंशसम्भवाय नमः | 20 | ओं प्रेक्षणीयोत्पलश्यामाय नमः |
| 21 | ओं आयुर्वेदाधिदैवताय नमः | 22 | ओं भेषजग्रहणानेहस्स्मरणीय-पदाम्बुजाय नमः |
| 23 | ओं नवयौवनसम्पन्नाय नमः | 24 | ओं किरीटान्वितमस्तकाय नमः |
| 25 | ओं नक्रकुण्डलसंशोभिश्रवण-द्वयशष्कुलये नमः | 26 | ओं दीर्घपीवरदोर्दण्डाय नमः |
| 27 | ओं कम्बुग्रीवाय नमः | 28 | ओं अम्बुजेक्षणाय नमः |
| 29 | ओं चतुर्भुजाय नमः | 30 | ओं शङ्खधराय नमः |

www.prapatti.com

| | | | |
|---|---|---|---|
| 31 | ओं चक्रहस्ताय नमः | 32 | ओं वरप्रदाय नमः |
| 33 | ओं सुधापात्रोपरिलसदाम्रपत्र-लसत्कराय नमः | 34 | ओं शतपद्याढ्यहस्ताय नमः |
| 35 | ओं कस्तूरीतिलकाञ्चिताय नमः | 36 | ओं सुकपोलाय नमः |
| 37 | ओं सुनासाय नमः | 38 | ओं सुन्दरभ्रूलताञ्चिताय नमः |
| 39 | ओं स्वङ्गुलीतलशोभाढ्याय नमः | 40 | ओं गूढजत्रवे नमः |
| 41 | ओं महाहनवे नमः | 42 | ओं दिव्याङ्गदलसद्बाहवे नमः |
| 43 | ओं केयूरपरिशोभिताय नमः | 44 | ओं विचित्ररत्नखचितवलयद्व-यशोभिताय नमः |
| 45 | ओं समोल्लसत्सुजातांसाय नमः | 46 | ओं अङ्गुलीयविभूषिताय नमः |
| 47 | ओं सुधागन्धरसास्वादमिलद्-भृङ्गमनोहराय नमः | 48 | ओं लक्ष्मीसमर्पितोत्फुल्ल-कञ्जमालालसद्गलाय नमः |
| 49 | ओं लक्ष्मीशोभितवक्षस्काय नमः | 50 | ओं वनमालाविराजिताय नमः |
| 51 | ओं नवरत्नमणीक्लृप्तहार-शोभितकन्धराय नमः | 52 | ओं हीरनक्षत्रमालादिशोभा-रञ्जितदिङ्मुखाय नमः |
| 53 | ओं विरजोऽम्बरसंवीताय नमः | 54 | ओं विशालोरसे नमः |
| 55 | ओं पृथुश्रवसे नमः | 56 | ओं निम्ननाभये नमः |
| 57 | ओं सूक्ष्ममध्याय नमः | 58 | ओं स्थूलजङ्घाय नमः |
| 59 | ओं निरञ्जनाय नमः | 60 | ओं सुलक्षणपदाङ्गुष्ठाय नमः |
| 61 | ओं सर्वसामुद्रिकान्विताय नमः | 62 | ओं अलक्तकारक्तपादाय नमः |

www.prapatti.com

| | | | |
|---|---|---|---|
| 63 | ओं मूर्तिमद्वार्धिपूजिताय नमः | 64 | ओं सुधार्थान्योन्यसंयुध्यद्देव-दैतेयसान्त्वनाय नमः |
| 65 | ओं कोटिमन्मथसङ्काशाय नमः | 66 | ओं सर्वावयवसुन्दराय नमः |
| 67 | ओं अमृतास्वादनोद्युक्तदेव-सङ्घपरिष्टुताय नमः | 68 | ओं पुष्पवर्षणसंयुक्तगन्धर्व-कुलसेविताय नमः |
| 69 | ओं शङ्खतूर्यमृदङ्गादिसुवादि-त्राप्सरोवृताय नमः | 70 | ओं विष्वक्सेनादियुक्पार्श्वाय नमः |
| 71 | ओं सनकादिमुनिस्तुताय नमः | 72 | ओं साश्चर्यसस्मितचतुर्मुखनेत्र-समीक्षिताय नमः |
| 73 | ओं साशङ्कसम्भ्रमदिति-दनुवंश्यसमीडिताय नमः | 74 | ओं नमनोन्मुखदेवादिमौलि-रत्नलसत्पदाय नमः |
| 75 | ओं दिव्यतेजःपुञ्जरूपाय नमः | 76 | ओं सर्वदेवहितोत्सुकाय नमः |
| 77 | ओं स्वनिर्गमक्षुब्धदुग्धवाराशये नमः | 78 | ओं दुन्दुभिस्वनाय नमः |
| 79 | ओं गन्धर्वगीतापदानश्रवणोत्क-महामनसे नमः | 80 | ओं निष्किञ्चनजनप्रीताय नमः |
| 81 | ओं भवसंप्राप्तरोगहृते नमः | 82 | ओं अन्तर्हितसुधापात्राय नमः |
| 83 | ओं महात्मने नमः | 84 | ओं मायिकाग्रण्यै नमः |
| 85 | ओं क्षणार्धमोहिनीरूपाय नमः | 86 | ओं सर्वस्त्रीशुभलक्षणाय नमः |
| 87 | ओं मदमत्तेभगमनाय नमः | 88 | ओं सर्वलोकविमोहनाय नमः |
| 89 | ओं स्रंसन्नीवीग्रन्थिबन्धासक्त-दिव्यकराङ्गुलये नमः | 90 | ओं रत्नदर्वीलसद्धस्ताय नमः |
| 91 | ओं देवदैत्यविभागकृते नमः | 92 | ओं सङ्ख्यातदेवतान्यासाय नमः |

| | | | |
|---|---|---|---|
| 93 | ओं दैत्यदानववञ्चकाय नमः | 94 | ओं देवामृतप्रदात्रे नमः |
| 95 | ओं परिवेषणहृष्टधिये नमः | 96 | ओं उन्मुखोन्मुखदैत्येन्द्र-दन्तपङ्क्तिविभाजकाय नमः |
| 97 | ओं पुष्पवत्सुविनिर्दिष्टराहु-रक्षःशिरोहराय नमः | 98 | ओं राहुकेतुग्रहस्थानपश्चाद्गति-विधायकाय नमः |
| 99 | ओं अमृतालाभनिर्विण्ण-युध्यद्देवारिसूदनाय नमः | 100 | ओं गरुत्मद्वाहनारूढाय नमः |
| 101 | ओं सर्वेशस्तोत्रसंयुताय नमः | 102 | ओं स्वस्वाधिकारसन्तुष्ट-शक्रवह्न्यादिपूजिताय नमः |
| 103 | ओं मोहिनीदर्शनायातस्थाणु-चित्तविमोहकाय नमः | 104 | ओं शचीस्वाहादिदिक्पालपत्नी-मण्डलसन्नुताय नमः |
| 105 | ओं वेदान्तवेद्यमहिम्ने नमः | 106 | ओं सर्वलोकैकरक्षकाय नमः |
| 107 | ओं राजराजप्रपूज्याङ्घ्रये नमः | 108 | ओं चिन्तितार्थप्रदायकाय नमः |

॥ इति श्रीधन्वन्तर्यष्टोत्तरशतनामावलिः संपूर्णा ॥

www.prapatti.com